**शकुन्तलाङ्गज** पु० ६त० । शकुन्तलासुते भरतनृपे हेमचन्द्र० ।

**शकुन्ति** पु० शक–उन्ति । १पक्षिमात्रे अमरः । २भासप-क्षिणि उणादिकोषः ।

**शकुल** पुंस्त्री० शक–उलच् । मत्स्यभेदे ( शउल ) अमरः । स्त्रियां ङीष् । [याम् राजनि० ।

**शकुलाक्षी** पु० शकुलस्याक्षीव अच् समा० ङीष् । गण्डदूर्वा०

**शकुलादनी** स्त्री० शकुलैरद्यते अद–ल्युट् । कटकी ) शाक-भेदे अमरः । २जटामांस्यां, ३जलपिप्पल्यां, कट्फले च विश्वः । [ ( गडुइ ) मत्स्ये । अमरः ।

**शकुलार्भक** पु० शकुलस्यार्भक इव क्षुद्रत्वात्तदाकारात्वाद्वा ।

**शकृत्** न० शक–ऋतन् । विष्ठायाम् अमरः ।

**शकृत्करि** पु० शकृत् किरति कृ–इन् । १गवादीनां २वत्से २वत्सायां स्त्री ङीप् ।

**शकृद्द्वार** न० ६त० । मलद्वारे अपानस्थाने हेमच० ।

**श(क्क)र** पु० शक–क्विप् कृ–अच् कर्म० शक–करप् वा । १वृषे मेदि० चतुर्दशाक्षरपादके २छन्दोभेदे । ३नदीभेदे ४मेखलायाञ्च स्त्री ङीप् । ५अङ्गुलौ सि०कौ० । पृषो० शर्करीत्यपि चतुर्दशाक्षरपादके छन्दसि ।

**शक्त** त्रि० शक–क्त । समर्थे हेमच० ।

**शक्ति** स्त्री शक–क्तिन् । १सामर्थ्ये २स्त्रीदेवतायां देवी-मूर्त्तौ । न्यायाद्युक्ते कारणनिष्ठे कार्य्योत्पादनयोग्ये ३धर्मभेदे । ३शब्दनिष्ठे अर्थबोधकतारूपे बोध्यत्वप्रकार-केच्छाविषयत्वरूपे वृत्तिभेदे शर्वलाख्ये ४अस्त्रभेदे च अमरः । मीमांसकमते शक्तिः पदार्थान्तरम् यथोक्तम् अनुमा०चि० । "स्यादेतत् ईश्वरवत् कार्य्येणैव शक्तिरप्यनुमीयते तथा हि यादृशादेव करानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते अतो यदभावात् कार्य्याभावस्तद् इत्याद्यवश्यं तेन विना तदभावात् यत्सद्भावानु-पपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः" । न्यायमते तन्निरा-करणमेव ईश्वरवादप्रन्थे दर्शितो यथा

"तृणारणिमणिफूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजानन्तशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्या-वान्तरवह्निव्यक्तिषु जातित्रयकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः गोमयप्रभव-वृश्चिकयोर्वा पाटलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्ष-सिद्धत्वात् तृणजन्यनानावह्निषु तृणजन्यत्वज्ञानानन्तरं तृणजन्यव्यावृत्त्याऽनुगतबुद्धिरस्ति जातिविषया । तृण-जन्यत्वेनोपाधिनाऽसाविति चेन्न बाधकं विनानुगतबुद्धे-स्तद्ग्राह्यजातिविषयत्वनियमात् । न च गोमयवृश्चिक-प्रभववृश्चिकजातिपरम्परायामनगतजात्यापत्तिः गोमय-जन्यवृश्चिकप्रभवत्वजातेः सत्त्वात् वह्निमात्रे च दाह्यस्पर्श-वानवयवः तत्संयोगः सेवनादिश्च कारणानि न तु तृणादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमा-दायैव साध्यसामग्र्याजनकत्वात्" ।

एवमाधेयशक्तिरपि मीमांसकमतेन पूर्वपक्षीकृत्य तत्र निरस्ता यथा तच्च प्रोक्षणप्रतिष्ठाशब्दयोर्दर्शितम् अधिकं किञ्चिदत्र प्रदर्श्यते यथा

"कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्श-नादपि नाधेयशक्तिः समयविशेषावच्छिन्नचरणदोहा-दिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्दृष्टभागा-न्तजनितदृष्टादेव वा तदुपपत्तिः कालान्तरे पुष्पाद्युत्क-र्षात् । दुःखावयवोपचयावश्यम्भावेन दृष्टभेदावश्यकत्वात् । नापि ताम्रकांस्यादावम्लभस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः तत्संयोगध्वंसस्य संयोगसमानकालीना-स्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् । भस्मादिसंयोगजनितः कांस्याद्युपभोक्तृ-निष्ठः संस्कार एव शुद्धिरित्यन्ये । अभिमन्त्रितपयः-पल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्याध्याद्यपनायकः तत्तन्मन्त्रदेवतासन्निधिरेव वा । कल-मबीजादीनामापरमाण्वन्तभङ्गे तत्र चावान्तर-जात्यभावे नियतकलमजातीयादिसिद्धिरपि । परमाणु-पाकजविशेषादेव कार्य्यवृत्तिरूपादि सजातीयस्य पूर्वरूपा-दिविजातीयस्य परमाणौ पाकजरूपादेरुभयासिद्धत्वात् यथा हि कमलबीजं यवादिजात्या व्यावर्त्त्यते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माषकर्षणजनितात् परमाणुपाकपरम्पराविशेषादेव हैमन्तिकशस्योत्पत्तिः । एतेन लाक्षारसावसेकादयो व्याख्याताः । निमित्तविशेष-जनितपाकजात्तत्फलविशेषः यथा हारीतमांसं हरिद्रा-नलसाधितमुपयोगात् सद्यो व्यापादयति नान्यथा साधि-तमित्यादि । यत्र च तोयतेजोवायुषु न पाकजो विशेष-स्तत्रोद्भवानुद्भवद्रवकाठिनत्वादयो विशेषास्तत्तदुपनायकादृ-ष्टविशेषादेव । तुलादौ चाधिवासपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञत्वसहिता प्राचीनाधर्मधर्मफले तज्जयभङ्गौ जनयति । यद्वा अयं निष्पापः पापवान् वेति तुलारूढाभिशस्तज्ञानविशेषसहिता सा तथा, त-दाहुः, "तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः" इति